National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 146-149
© 2025 NJHSR
www.sanskritarticle.com

डॉ. रमेशमालाकारः
अतिथि शिक्षकः (संस्कृतविभागः),
जय-नारायण-व्यास-विश्वविद्यालयः,
जोधपुरः, राज. 342011

Correspondence:
डॉ. रमेशमालाकारः
अतिथि शिक्षकः (संस्कृतविभागः),
जय-नारायण-व्यास-विश्वविद्यालयः,
जोधपुरः, राज. 342011

# काव्यस्याक्षरिकार्थस्य विश्लेषणात्मकमध्ययनम्

**डॉ. रमेशमालाकारः**

सहितस्य भावः साहित्यम्। 'सहित' इत्यनेन सह भावार्थे 'ष्यञ्' प्रत्यययोगेन 'साहित्यम्' इति शब्दस्य निष्पत्तिः। यस्यार्थस्तु वर्तते मेलनम्। सहित+ष्यञ्=साहित्यम्/मेलनम्। यत्र एकेन वस्तुना सह बहुवस्तूनां मेलनं भवति तदेव साहित्यम्। अतिप्राचीनकालादेव काव्यस्य पर्यायवाचीशब्दत्वेन 'साहित्यम्' इति शब्दस्य प्रयोगः दृश्यते। यथा-

**'पञ्चमी' साहित्यविद्या इति यायावरीय'।**[1]

**'व्याकरणमीमांसातर्कसाहित्यात्मकेषु चतुर्षु शास्त्रेषूपयोगात्।'**[2]

इत्येनेषु वाक्येषु काव्यार्थैव 'साहित्यमिति' शब्दस्य प्रयोगं चक्रुः विविधाः साहित्याचार्याः। तस्माद्धेतोः काव्ये शब्दार्थौ सम्मिलितरूपेण प्रयुक्तौ। सप्तशताब्द्याः प्रसिद्धालंकारिकाचार्यो भामहः स्वतन्त्ररूपेण काव्यलक्षणं लक्षयति-

**'शब्दार्थौ सहितौ काव्यम्'।**[3]

परन्तु अत्र प्रश्नः उदेति यत् काव्यं विना अन्यस्मिन् शास्त्रेऽस्मिन् शब्दार्थौ सन्निहितौ विद्येते। काव्यस्य विशेषत्वं किम्? अस्याः समस्यायाः समाधानाय आचार्यराजशेखरेनोक्तम्-

**'शब्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्या'।**[4]

अत्र स्पष्टं यत् काव्ये शब्दार्थयोः सहभावं समरूपेण विद्यते। अन्यस्मिन् शास्त्रे केवलमात्रं अर्थप्रतीतयैव शब्दम् आश्रयते। परन्तु काव्ये शब्दानुरूपम् अर्थस्य अर्थानुरूपञ्च शब्दस्य प्रयोजनं विद्यते। साहित्यम् शब्दस्य विश्लेषणे प्रयुक्तः सन् वक्रोक्तिजीवितकारः कुन्तकोऽपि निगदति यत् -

**"वाच्यार्थो वाचकः शब्दः प्रसिद्ध।**
**तथापि काव्यमार्गेऽस्मिन् परमार्थोयमेतयोः॥"**[5]
**"शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दर॥"**[6]

अन्यस्मिन् शास्त्रे वर्णणीयार्थस्य वाचकशब्दरूपेण कस्यचन शब्दस्य प्रयोगो भवति। किन्तु काव्ये प्रयुक्तः शक्यते तद्रूपः वर्णणीयवाचकशब्दः यः एव केवलमात्रं कवेः विवक्षितार्थस्य वाचकः। अपि च काव्यार्थः भवेत् काव्यमर्मज्ञसहृदयस्याह्लादजनकः। काव्ये शब्दार्थयोः मध्ये पारस्परिकं सहितभावो विद्यमानो भवेत्। काव्यार्थैव साहित्यशब्दप्रयोग इति एतदेव विशेषत्वम्। साम्प्रतं काव्यग्रन्थस्य वाचकत्वेन रूढार्थे साहित्यशब्दस्य प्रयोगो दृश्यते। अनन्तरं ज्ञातव्यं काव्यं किम्?

**काव्यस्याक्षरिकार्थः-**

'कवि' इति शब्दोत्तरं भावार्थे 'ष्यञ्' प्रत्यययोगेन 'काव्यम्' इति शब्दस्य निष्पत्तिः। 'कवेरिदं कार्यं भावो वा'(ष्यञ्)।[7] अत्र ज्ञातव्यः कविशब्दस्यार्थः-"कवते सर्वं जानाति सर्वं वर्णयतीति कविः"।[8]

अपि च अमरकोषानुसारे- "कवते श्लोकान् ग्रथते वर्णयति वा"।[9] अर्थात् यः सर्वज्ञः सर्वविषयस्य वर्णयिता च स एव कविः।

कवि तस्य अपूर्ववस्तुनिर्मानक्षमप्रतिभाबलेन सहृदयस्य पाठकस्य वा हृदि अलौकिकानन्दनिष्यन्दीधारायुक्तस्य अन्तर्जगतः बहिर्जगतः वा व्यापारमयस्य यस्य शब्दार्थस्य सहयोगं सृजति तस्यैव नाम काव्यम्। अर्थात् अलौकिकानन्दमयौ शब्दार्थौ काव्यम्।

**आलङ्कारिकाणां दृष्ट्यां काव्यस्यार्थः-**

विविधानामालङ्कारिकाणां मतानुसारेऽपि काव्यस्य विविधार्थाः राराजन्ते। या कविकृतिः काव्यसंज्ञा प्राप्ता तस्याः स्वरूपविषये आलङ्कारिकाः स्वतन्त्ररूपेणस्वाभिमतं प्रदत्तवन्तः। भरतमुनिः भारतीयकाव्यशास्त्रजगते आद्याचार्यरूपेण प्रसिद्धो वर्तते। आचार्यभरतमुनेः प्रधानाभिप्रायः नाट्यचिन्तनम् आसीत्। प्रसङ्गक्रमे काव्यतत्त्वानुचिन्तरं चकार। भरतमुनिः काव्यलक्षणविषये नाट्यशास्त्रे श्लोकमेकमुद्धृतवान्-

**"मृदुललितपदाढ्यं गूढशब्दार्थहीनं**
**जनपदसुबोध्यं युक्तिमन्नृत्ययोज्यम्।**
**बहुकृतरसमार्गं सन्धिसन्ध्यायुक्तं**
**स भवति शुभकाव्यं नाटकप्रेक्षकाणाम्॥"**[10]

आलोच्ये श्लोके मृदुललितपदावली-गूढाशब्दार्थहीनता-सर्वसुगमता-युक्तिमत्ता-नृत्योपयोग्यता-बहुकृत- रसमार्गता-सन्धियुक्तता-काव्यस्ये-मानि सप्ततत्त्वानि भरतमुनिना उल्लिखितानि। इमानि काव्यस्य विशेषणानि। विशेषान्यवलम्बनं कृत्वा भरतमुनिना काव्यस्वरूपं विश्लेषितम्-

- यत्र तथा यस्मिन् वाक्ये अर्थानुरूपमधुरशब्दावल्याः समावेशोऽस्ति तत् काव्यम्।
- माधुर्य-ओज-प्रसादादि गुणयुक्तं सर्वजनसुगमं गूढशब्दार्थहीनं वाक्यं काव्यम्।
- रसयुक्तपदावली हि काव्यम्।

काव्येषु सप्ततत्त्वेषु आचार्यभरतमुनिनां नृत्योपयोग्यता सन्धियुक्तता वा दृश्यकाव्यस्योपयोगीविषयरूपेण गृह्येते। भरतमुनेः पश्चात् आचार्यभामहः काव्यतत्त्वोद्घाटस्य नवमार्गदर्शकः। आचार्यभामहेन सर्वाग्रे स्वतन्त्रकाव्यलक्षणं ज्ञापितम्-

**"शब्दार्थौ सहितौ काव्यम्।"**[11]

अर्थात् शब्दार्थयोः सहभावः काव्यम्। भामहः 'सहितौ' इति पदेन शब्दार्थयोः सहभावं प्रदर्शयति। काव्ये शब्दः अर्थानुरूपम् अर्थः शब्दानुरूपं वा भवेत्। भामहेन शब्दार्थयोः समन्वयः साधितः। भामहसमसमयिकाचार्यदण्डी काव्यविषये उक्तवान्-

**"शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली॥"**[12]

दण्डीमतानुसारे अलङ्कारो हि काव्यसौन्दर्य्यस्य मूलम्। तदनुसारेण इष्टार्थेन तथा अभिलषितार्थेन सहान्विता पदावलीमेव काव्यमिति कथ्यते। दण्डिन काव्यशरीरगठनार्थं विवक्षितार्थेन सह युक्ता पदावली स्वीकृता। अलङ्कारो हि अभिलषितार्थः तथा चमत्कारपूर्णः। अलङ्कारो हि काव्योपकरणं यस्य समावेशत्वेन काव्यं चिरजीवी भवति। अथः अलङ्कारयुक्ता चमत्कारपूर्णा वा पदावली काव्यम्।

अनन्तरं वामनाचार्यः त्रिभिः सूत्रैः काव्यस्यार्थं स्पष्टीकृतवान् -

**I."काव्यं ग्राह्यमलङ्कारात्"**[13]

**अर्थात् अलङ्कारसहितं काव्यं ग्राह्यं स्पृहणीयं वा।**

**II."सौन्दर्य्यमलङ्कारः"**[14]

**अर्थात् सौन्दर्य्यं हि अलङ्कारः।**

**III."स दोषगुणालङ्कारहानादानाभ्याम्"**[15]

**अर्थात् यदि दोषरहितं गुणयुक्तं चेत् काव्यं सौन्दर्य्यप्राप्तम्।**

त्रिसूत्रेनानेन आचार्यवामनेन 'काव्यालङ्कारसूत्रवृत्तिः' इति ग्रन्थवृत्त्यामुक्तम्-

**"काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते।"**

अर्थात् गुणालङ्कारयुक्तौ शब्दार्थौ हि काव्यम्। काव्यमितित शब्द एतादृशोः शब्दार्थयोः वाचकः, यत्र गुणालङ्कारौ विद्येते। काव्यलक्षणे वामनाचार्येण शब्दार्थेति पदे लाक्षणिकप्रयोगः क्रियते। अपि च वामनेन काव्यविषये एकनवीनमतमपि प्रदत्तम्। वामनेनोक्तम्-

**"रीतिरात्मा काव्यस्य"।**[16]

सूत्रस्येतस्य वृत्त्यामुक्तम्-

**"रीतिर्नामेयमात्मा काव्यस्य। शरीरस्येवेति वाक्यशेषः"।**[17]

एतया वृत्त्या वामनाचार्येण स्वीकृतम्- रीतिः काव्यस्यात्मा, शब्दार्थौ काव्यस्य शरीरम् वा। आचार्यवामनेन काव्यस्य सौन्दर्य्यतत्त्वमप्युघटितम्। गुणः हि काव्यशोभायाः कर्त्ताधर्मः। अलङ्कारः काव्यशोभायाः वृद्धिकर्त्ता। वामनाचार्यस्य पश्चात् आचार्यआनन्दवर्धनेन ध्वनिः काव्यात्मभूततत्त्वरूपे प्रतिष्ठितम्। अतः तेनोक्तम्-

**"काव्यस्यात्मा ध्वनिरिति॥"**[18]

ध्वनेरेतस्य द्विविधत्वम् उल्लिखितम्- वाच्यार्थः प्रतीयमानार्थः वा। वाच्यार्थः सर्वजनबोध्यम्। परन्तु प्रतीयमानार्थः वाच्यार्थतः भिन्नः अपूर्वः वा। प्रतीयमानार्थः वा ध्वनिः केवलं सहृदयस्य उपादेयम्। यथा- अङ्गनायाः लावण्यं तस्याः गठनसौन्दर्य्यात् भिन्नम्। यदि काव्ये अङ्गनायाः देहलावण्यवत् प्रतीयमानार्थः न विद्यते तर्हि गुणालङ्कारशोभितौ शब्दार्थौ काव्यं न भवति। अतः प्रतीयमानार्थः हि काव्यात्मभूततत्त्वम्। प्रतीयमानार्थयुक्तौ शब्दार्थौ हि काव्यम्। यद्यपि ध्वनिकारआनन्दवर्धनेन स्वतन्त्ररूपेणकाव्यलक्षणं नालो-चितम्। तथापि 'ध्वन्यालोक' इति ग्रन्थमध्ये स्थापितसूत्रात् काव्यविषये धारणा प्राप्ता। यथा-

**i."शब्दार्थशरीरं तावत् काव्यम्"।**[19]

**ii."सहृदयहृदयह्लादिशब्दार्थमयत्वेन काव्यलक्षणम्"।**[20]

अभिनवगुप्ताचार्यः आनन्दवर्धनकृतस्य 'ध्वन्यालोक' ग्रन्थस्य लोचनटीकायाः व्याख्याकारः। तेन लोचनटीकायाम् काव्यस्य व्युत्पत्तिगतार्थः क्रियते-"कवनीय काव्यम्"।

लोचनटीकायाम् काव्यलक्षणमपि उक्तम्-

**"गुणालङ्कारौचित्य सुन्दरशब्दार्थशरीरस्य सति**
**ध्वननाख्यात्मनि काव्यरूपताव्यवहारः"।**[21]

अर्थात् गुणालङ्कारयोः औचित्ययोः सुन्दरशब्दार्थरूपशरीरं यदा ध्वनिरूपात्मया सह युक्तं तदेव काव्यम्। अनन्तरं वक्रोक्तिजीवतकारकुन्तकेन काव्यस्य व्युत्पत्तिः विहिता-

**"कवेः कर्म काव्यम्"**।[22]

उक्तेरस्याः स्पष्टीकरणार्थं कुन्तकाचार्यः उक्तवान्-

**"सालङ्कारस्य काव्यता"**।[23]

अर्थात् अलङ्कारयुक्तशब्दार्थसमुदाय हि काव्यता तथा कविकर्मत्वम्। तदनुसारेण अलङ्कारयुक्तौ शब्दार्थौ काव्यम्। अपि च कुन्तकाचार्यः काव्यस्य व्यवस्थितलक्षणं लक्षयति-

**"शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**
**वन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥"**[24]

अर्थात् विचित्रप्रकाशभङ्गिसमन्वितौ कविभावनाविधृतौ काव्यमर्मज्ञसहृदयस्य आनन्दविधायकौ रचनानिबन्धे सम्मिलितौ शब्दार्थौ काव्यम्। सहभावापन्नशब्दार्थौ कवेः वक्रोक्तिव्यापारयुक्तबन्धनेन सह व्यवस्थितौ चेत् काव्यं भवति।

तत्पश्चात् मम्मटाचार्यः स्वप्रतिभावसहयोगेन काव्यजगते नव्यतां प्रदर्शयति। नव्यतासहयोगेन मम्मटाचार्येण काव्यलक्षणं विहितम्-

**"तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि"**[25]

अर्थात् दोषरहितौ गुणयुक्तौ कदापि सालंकारौ कदापि निरलंकारौ शब्दार्थौ काव्यम्। मम्मटकृतकाव्यलक्षणमिदं विश्लेषितं चेत्, काव्यसंज्ञा स्पष्टरूपेण बोध्या। यथा-

- अदोषता काव्यस्य अनिवार्यविशेषता।
- केवलशब्देन केवल अर्थेन वा काव्यसंज्ञा न भवति, शब्दार्थयोः समष्टिः काव्यम्।
- काव्यं गुणयुक्तम् अर्थात् माधुर्य-ओज-प्रसाद-प्रभृतीनां गुणानामुपस्थितिः अनिवार्या।
- 'सगुणौ' पदेन काव्ये रसध्वनेः आवश्यकता स्वीकृता। यदि कदापि काव्यम् अलङ्कारयुक्तं रसमयं चेत्, अलङ्काराभावेऽपि काव्यत्वम् अक्षुण्णम्।

मम्मटपरवर्तीकाले आलङ्कारिकहेमचन्द्राचार्येण काव्यलक्षणं क्रियते-

**"अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्॥"**[26]

संस्कृतजगतः लोकप्रियाचार्यः जयदेवः काव्यस्वरूपं उद्घाटितवान्-

**"निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।**
**सालङ्काररसानेकवृत्तिर्वाक्काव्यनामभाक्॥"**[27]

**निष्कर्षः –**

शोधपत्रेऽस्मिन् काव्यस्याक्षरिकार्थस्य पर्यालोचनं विहितमस्ति। काव्यशास्त्रकाराणां मते काव्यस्य लक्षणानि अत्र उपस्थापितानि सन्ति। साहित्यकाराणां नये काव्यपठनेन परमप्राप्तिः भवति। परमानन्दरूपो वर्त्तते रसः। तथाहि उक्तमस्ति - साहित्यदर्पणः हि काव्यतत्त्वस्य यथार्थदर्पणः। साहित्यदर्पणकारविश्वनाथः पूर्वाचार्याणाम् अभिमतमनुसरणं न कृत्वा स्वतन्त्ररूपेण काव्यलक्षणं चकार-

**"वाक्यं रसात्मकं काव्यम्॥"**[28]

अत्र रसः हि काव्यस्य सर्वोच्चतत्त्वं प्राणभूततत्त्वम् वा। रसाभावात् काव्यम् अस्तित्वहीनम्। 'रस्यते इति रसः' इति व्युत्पत्त्यानुसारेण भाव-भावाभास-भावोदय-भावशान्ति-भावशबलता-रसाभास-इत्यादीन् रसास्वादितविषयानपि ग्रहणीय। अर्वाचीनकालस्यालङ्कारिकपण्डितराजजगन्नाथेन काव्यसंज्ञा प्रतिपादिता - "रमणीयार्थप्रतिपादकः शब्दः काव्यम्"॥[29]

तेन मतानुसारेण यः शब्दः रमणीयार्थबोधं कारयति तदेव काव्यम्। यस्मात् ज्ञानात् अलौकिकानन्दः जायते सः रमणीयार्थः। पण्डितराजजगन्नाथेन 'काव्यगतानन्दमेव अलौकिकानन्द' इत्युक्तम्। अयम् अलौकिकानन्दः सहृदयाह्लादकः।

अनेन परिज्ञायते संस्कृतसाहित्ये रसः प्रमुखतत्त्वमिति मन्यते। रस (रस्+अच्) शब्दस्य कोशगतार्थः अस्ति – सारः, जलम्, मधुराम्लादि षड् रसाः, रसायन-पारद-वीर्य-विष-दुध-अमृत-स्वादानन्दादि।[30] सुखार्थः सर्वभूतानां प्रवृत्तिः। सर्वे प्राणीनः कीटपतङ्गादि तथा ब्रह्मापि सुखानन्दं रसं प्राप्तुमिच्छन्ति। तैत्तरीयोपनिषदि रसः परमब्रह्मेत्युक्तं यतो हि तं रसं प्राप्तं जीवाः सुखानन्दं अनुभवन्ति। यथा- **'रसो वै सः रसं ह्योवायं लब्धानन्दी भवति।'**

सः एषः आत्मा रसः, अयं जीवः आत्मानन्दरसं लब्ध्वा एव हि आनन्दी भवति। आत्मा रसस्वरूपः। रसो नाम आनन्दः। आनन्दस्वरूप एव आत्मा। अयम् आनन्दस्वरूपः आत्मैव सर्वस्यापि जीवस्य आनन्दित्वे कारणम्। सर्वः प्राणी सर्वथा जीवितुमिच्छति अस्य कारणं रसस्वरूपस्य ब्रह्मणः एतेषां प्रत्यगात्मत्वात्। '**तपस्विनः बाह्यसुखसाधनरहिता अपि अनीहाः निरेषणाः ब्राह्मणाः बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसः**' इति शाङ्करभाष्यम्।

**ग्रन्थसूची —**


- अलङ्कारशास्त्रस्येतिहासः – डा. जगदीशचन्द्र मिश्रः चौखम्बा प्रकाशनम् वाराणसी, प्रथमसंस्करणम् -२००१.
- ऋग्वेदः – अनु. व्या. सम्पा. डा. जियालाल काम्बोज विद्यानिधि प्रकाशन, दिल्ली – २००४.
- काव्यप्रकाशः– श्रीमम्मटभट्टविरचितः, प्रो. विश्वनाथभट्टाचार्य, प्रो. जयशङ्करलाल त्रिपाठी, का. हि. विश्वविद्यालयसंस्कृतग्रन्थमाला, का. हि. वि. वि. वाराणसी – २००३.
- काव्यालङ्कारः – श्रीभामहाचार्येण विरचितः, काशीसंस्कृतग्रन्थमाला ६१, चौखम्बसंस्कृतसंस्थानम्, वाराणसी, तृतीयसंस्करणम् – २००२.
- काव्यालङ्कारसारसंग्रहः– उद्भटभट्टकृत, डा. रमणकुमार शर्मा, विद्यानिधिप्रकाशन, दिल्ली – २०१०.

- काव्यालङ्कारसूत्राणि – श्रीवामनाचार्यविरचितम्, चौखम्बा-संस्कृतग्रन्थमाला, वाराणसी – २००५.
- काव्यालङ्कारः - श्रीभामहाचार्येण विरचितः, बिहारराष्ट्रभाषा-परिषद्, पटना – १९६२.
- दशरूपकम् – धनञ्जयः, धनिकाकृतावलोकसहितम्, चौखम्बा विद्याभवन, वाराणसी, प्रथमसंस्करणम् – १९६७.
- ध्वन्यालोकः – श्रीमदानन्दवर्धनाचार्य विरचितः, श्रीअभिनव-गुप्तविरचितः 'लोचन' समन्वितः, डा गङ्गासागररायः, चौखम्बा-संस्कृतभवनग्रन्थमाला ४२, चौखम्बासंस्कृतभवन, वाराणसी, प्रथमसंस्करणम् – २००४.
- ध्वन्यालोकः– आचार्यचण्डिकाप्रसादशुक्लसम्पादितः, विश्वविद्या-लय-प्रकाशनम्, वाराणसी, प्रथमसंस्करणम् – १९८१.
- नाट्यशास्त्रम् – आचार्यभरतमुनि विरचितः, परिमल पब्लिकेशन, दिल्ली, प्रथमसंस्करणम् – १९९८.
- व्यक्तिविवेकः, महिमभट्टविरचितः, पं. रेवाप्रसादद्विवेदी, काशी-संस्कृत-ग्रन्थमाला १२१, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, पुनर्मुद्रणम्, २००४.
- व्यक्तिविवेकः, महिमभट्टविरचितः, विवेकसुदर्पणोपेतः, सिन्धु-प्रकाशनम्, हैदराबाद्, प्रथमप्रकाशनम् २०१२.
- साहित्यदर्पणः-विश्वनाथविरचितम्, काशीसंस्कृतग्रन्थमाला १४५, चौखम्बासंस्कृतसंस्थान, वाराणसी, पुनर्मुद्रणम् – २०११.
- वक्रोक्तिजीवितम्,श्रीमद्राजानककुन्तकविरचितंबालबोधिनीसंस्कृत-हिन्दी-व्याख्योपेतम्, सम्पादकव्याख्याकारः, डॉ.रमाकान्तपाण्डेयः, जगदीश संस्कृत पुस्तकालय, जयपुर-३०२००१, २०१०.


**पाद टिप्पणी -**

1 राजशेखर, काव्यमीमांसा

2 मुकुलभट्ट, अभिधावृत्तिमातृका

3 काव्यालङ्कारः(१/२६)

4 राजशेखर, काव्यमीमांसा

5 वक्रोक्तिजीवनम्(१/८)

6 वक्रोक्तिजीवनम्(१/९)

7 मेदिनीकोष

8 शब्दकल्पद्रुम

9 अमरकोष

10 नाट्यशास्त्रम्(१६/११८)

11 काव्यालङ्कारः(१/१६)

12 काव्यादर्शः(१/१०)

13 काव्यालंकारसूत्रवृत्तिः(१/१/१)

14 काव्यालंकारसूत्रवृत्तिः(१/१/२)

15 काव्यालंकारसूत्रवृत्तिः(१/१/३)

16 काव्यालंकारसूत्रवृत्तिः(१/२/६)

17 काव्यालंकारसूत्रवृत्तिः(१/२/६)

18 ध्वन्यालोकः(१/१)

19 ध्वन्यालोकः प्रथमोद्योतः व्याख्या

20 ध्वन्यालोकः प्रथमोद्योतः व्याख्या

21 ध्वन्यालोकः लोचन(१/४)

22 वक्रोक्तिजीवितवृत्तिः(१/२)

23 वक्रोक्तिजीवित(१/६)

24 वक्रोक्तिजीवित(१/७)

25 काव्यप्रकाशः(१/४)

26 काव्यानुशासनम्(प्रथमोऽध्यायः)

27 चन्द्रालोकः(१/७)

28 साहित्यदर्पणः१/३

29 रसगङ्गाधरः

30 संस्कृत-हिन्दी शब्दकोश, वामन शिवराम आप्टे, पृ-८४९